# Shri Durgastavah

# श्रीदुर्गास्तवः

## Document Information

Text title : durgAstavaH 2 by Shri vAdirAja

File name : durgAstavaH2vAdirAja.itx

Category : devii, devI, durgA, vAdirAja

Location : doc_devii

Author : Vadiraja

Latest update : December 30, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 31, 2020

*sanskritdocuments.org*

# श्रीदुर्गास्तवः

सन्नद्धसिंहस्कन्धस्थां स्वर्णवर्णां मनोरमाम् ।
पूर्णेन्दुवदनां दुर्गां वर्णयामि गुणार्णवाम् ॥ १॥

किरीटहारग्रैवेयनूपुराङ्गदकङ्कणैः ।
रत्नकाञ्च्या रत्नचित्रकुचकञ्चुकतेजसा ॥ २॥

विराजमाना रुचिराम्बरा किङ्किणिमण्डिता ।
रत्नमेखलया रत्नवासोपरि विभूषिता ॥ ३॥

वीरशृङ्खलया शोभिचारुपादसरोरुहा ।
रत्नचित्राङ्गुलीमुद्रा रत्नकुण्डलमण्डिता ॥ ४॥

विचित्रचूडामणिना रत्नोद्यत्तिलकेन च ।
अनर्घ्यनासामणिना शोभिताऽऽस्यसरोरुहा ॥ ५॥

भुजकीर्त्या रत्नचित्रकण्ठसूत्रेण चाङ्किता ।
पद्माक्षिणी सुबिम्बोष्ठी पद्मगर्भादिभिः स्तुता ॥ ६॥

कबरीभारविन्यस्तपुष्पस्तबकविस्तरा ।
कर्णनीलोत्पलरुचा लसद् भ्रूमण्डलत्विषा ॥ ७॥

कुन्तलानां च सन्तत्या शोभमाना शुभप्रदा ।
तनुमध्या विशालोरःस्थला पृथुनितम्बिनी ॥ ८॥

चारुदीर्घभुजा कम्बुग्रीवा जङ्घायुगप्रभा ।
असिचर्मगदाशूलधनुर्बाणाङ्कुशादिना ॥ ९॥

वराभयाभ्यां चक्रेण शङ्खेन च लसत्करा ।
दंष्ट्राग्रभीषणास्योत्थ हुङ्कारार्दितदानवा ॥ १०॥

भयङ्करी सुरारीणां सुराणामभयङ्करी ।
मुकुन्दकिङ्करी विष्णुभक्तानां मौक्तशङ्करी ॥ ११॥

सुरस्त्रीकिङ्करीभिश्च वृता क्षेमङ्करी च नः ।
आदौ मुखोद्गीर्णनानाऽऽम्नाया सर्गकरी पुनः ॥ १२॥

निसर्गमुक्ता भक्तानां त्रिवर्गफलदायिनी ।
निशुम्भशुम्भसंहर्त्री महिषासुरमर्दिनी ॥ १३॥

तामसानां तमःप्राप्त्यै मिथ्याज्ञानप्रवर्तिका ।
तमोभिमानिनी पायाद्दुर्गा स्वर्गापवर्गदा ॥ १४॥

इमं दुर्गास्तवं पुण्यं वादिराजयतीरितम् ।
पठन्विजयते शत्रून्मृत्युं दुर्गाणि चोत्तरेत् ॥ १५॥

॥ इति श्रीवादिराजयतिकृतः श्रीदुर्गास्तवः सम्पूर्णः ॥

---

*Shri Durgastavah*

pdf was typeset on December 31, 2020

Please send corrections to *sanskrit@cheerful.com*